

संस्कृत भारती

अक्षरम्, ८ उपमार्गः, २ घट्टः गिरिनगरम्, बेङ्गलूरु - ५६० ०८५.

पत्रालयद्वारा संस्कृतम्

संस्कृतम् संस्कृतम् संस्कृतम् संस्कृतम् संस्कृतम्

PARICHAYA -2

Bk. Demian 2000

Why Propagation of Samskrit and How ?

When we send greeting on ouspicious occasions like birthday, Holi, Diwali etc in Samskrit

- It may create interest among the receivers to learn this language
- They may extend cooperation in our work.
- They may also start correspondence in Samskrit.

Articles in news papers :

Articles related to Samskrit can be sent to different newspapers and magzines for pubication. The articles may contain the richness, the glory and the usefulness of Samskrit. So that it may be the best for the propagation of Samskrit.

Speaking in Samskrit in public places:

When we go outside it is desirable that we speak to each other in Samskrit. Not only do the people have opportunities to hear Samskrit but they will have opportunities to speak also.

Indeed this will arouse a feeling of admiration for Samskrit in them. Whenever we meet any lover of Samskrit we should speak in Samskrit.

Note:
The matters given in the inner pages of the cover are only for information. Questions on these points will not be asked in the exam.

ॐ

जयतु संस्कृतम् - जयतु मनुकुलम्

संस्कृतभारती

Samskrita Bhāratī

पत्रालयद्वारा संस्कृतम्
Samskrit Through Correspondence
'Aksharam' 8th cross, Girinagar II Phase,
Bangalore-560 085. Ph.: 6721052

परिचयः - PARICHAYA

द्वितीयः पाठः - SECOND LESSON

॥ आलस्यं हि मनुष्याणां शरीरस्थो महान् रिपुः ॥

Laziness is, indeed, a great enemy residing in the body of men.

१. विभक्तीनां परिचयः

In the previous lesson, we got acquainted with the Nominative case. We shall know about the Accusative case in the present lesson.

द्वितीयाविभक्तिः (Accusative case)

	पुं.	स्त्री.	नपुं.
अकारान्तः-	रामं-रामान्	- -	वनम्-वनानि
आकारान्तः-	- -	रमाम्-रमाः	दधि-दधीनि
इकारान्तः-	हरिम्-हरीन्	मतिम्-मतीः	दधि-दधीनि
ईकारान्तः-	- -	नदीम्-नदीः	- -
उकारान्तः-	गुरुम्-गुरून्	धेनुम्-धेनूः	मधु-मधूनि

All words ending in 'अ' in the Masculine (पुं) are declined like 'राम' and those in Neuter (नपुं) are declined like 'वन';

Feminine (स्त्री) words ending in 'आ' are like 'रमा'. Masculine words ending in 'इ' and 'उ' are respectively like 'हरि:' and 'गुरु', Feminine words ending in 'इ' and 'ई' are like मति: and 'नदी' respectively.

VERBS

Present Tense		Past Tense	
खादति	**खादन्ति**	**अखादत्**	**अखादन्**
खादसि	**खादथ**	**अखादः**	**अखादत**
खादामि	**खादामः**	**अखादम्**	**अखादाम**

Verbs in the Present Tense are conjugated like 'खादति' and those in the Past Tense are like 'अखादत्.'

Let us form sentences using the words in the Accusative Case and the Verbs in the Present and Past Tenses :

१) चित्रकार: **चित्रं** लिखति ।
२) तक्षक: **काष्ठं** तक्षति ।
३) कपय: **तरून्** आरोहन्ति ।
४) कवय: **पद्यानि** लिखन्ति ।
५) शिशव: **शब्दरूपावलीं** पठन्ति ।
६) मुनय: **रमापतिम्** अभजन् ।
७) धीरा: **गिरीन्** आरोहन्ति ।
८) शत्रव: **नगरीम्** आक्रामन्ति ।
९) छात्रा: **गुरून्** अपृच्छन् ।
१०) गुरव: **उत्तराणि** अवदन् ।
११) सीता **मणीन्** अयच्छत् ।
१२) अङ्गना: **श्लोकान्** गायन्ति ।
१३) श्रुतय: **धर्मं** बोधयन्ति ।
१४) कुमारी **अतिथीन्** पृच्छति ।
१५) तरुण्य: **विद्यालयं** प्रविशन्ति ।
१६) समिति: **अनुमतिम्** अयच्छत् ।

१७) व्याघ्री **वनम्** अधितिष्ठति ।
The tigress is in the forest.
१८) विष्णु: **क्षीराब्धिम्** अधितिष्ठति ।
१९) पार्वती **कैलासगिरिम्** अधिवसति ।
Parvati lives in Kailasa mountain.
२०) रमा **कमलम्** अधिवसति ।
२१) कुटुम्बिन्य: **देवताम्** अभित: उपविशन्ति ।
२२) **हिमालयम्** अभित: अरण्यानि सन्ति ।
There are forests around Himalaya.
२३) वैदेही **रामं** विना न विहरति ।
२४) ऋषय: **आहारं** विनापि जीवन्ति ।
Sages live even without food.
२५) सैनिका: **मार्गम्** उभयत: अगच्छन् ।
२६) नार्य: **गृहम्** उभयत: मार्जयन्ति ।
Women wash both sides of the house.

Meaning of Difficult Words

1. तक्षक: - Carpenter, 2. तक्षति - Chops, 3. तरून् - Trees, 4. शिशव: - Children, 5. अभजन् - Served, 6. अङ्गना: - Women, 7. श्रुतय: - Vedas, 8. अतिथीन् - Guests, 9. पृच्छति - Asks, 10. तरुण्य: - Young Women, 11. कुटुम्बिन्य: - Housewives, 12. वैदेही - Sita, 13. आहारम् - Food.

Some Rules Pertaining to the Accusative Case

1. When the questions 'what?' and 'whom?' are put, the answer that comes is the object. In the Active voice the object is in the Accusative Case.
   चित्रं लिखति । किं लिखति ? चित्रम् - The Picture.

2. When तिष्ठति and वसति are preceded by the Preposition (उपसर्ग) 'अधि' the words expressing Location, (which should have been in the Locative case (सप्तमी) will be in the Accusative Case.

   व्याघ्री कुत्र अधितिष्ठति ? वनम् ।

   Where does the tigress live? In the forest. Here we have वनम् instead of वने ।

3. When the words अभितः, परितः and उभयतः are used, words expressing the idea of the Genitive case should be in the Accusative Case.

   कम् अभितः अरण्यानि सन्ति ? हिमालयम् ।

   Around which are the forests ? Around Himalaya. Here हिमालयम् is used for हिमालयस्य ।

4. Similarly when विना is used, words governed by it are often in the Accusative case; गुरुं विना न विद्याप्राप्तिः ।

प्रश्नाः

I. Answer the following :

१) तक्षकः किं तक्षति ? २) काः श्लोकान् गायन्ति ?

३) कुमारी किं करोति ? ४) का वनम् अधितिष्ठति ?

५) ऋषयः कं विना जीवन्ति ? ६) अरण्यानि कुत्र सन्ति ?

II. Convert the following words (in the the Nominative Case) into Accusative Case and use them in your own sentences :

Eg.- रविः - भारतीयाः रविम् अर्चन्ति ।

१) कस्तूरी, २) रश्मिः - Ray, ३) वेणुः - Flute, ४) वीणा, ५) जनकः, ६) अग्रजः

२. चाटुश्लोकः - २

Children quarrel and take their complaint to the mother. This is a familiar sight in every home. Here are Ganapati and Shanmukha. The sons of Parvati, engaged in a quarrel. Ganapati is weeping. Parvati asks as to what is the matter ? Each son gives his own version of the quarrel :

हे हेरम्ब ! किमम्ब ! रोदिषि कुतः ? कर्णौ लुठत्यग्निभूः
किन्ते स्कन्द ! विचेष्टितं मम पुरा सङ्ख्या कृता चक्षुषाम् ।
नैतत्तेऽप्युचितं गजास्य ! चरितं नासां मिमीतेऽम्ब ! मे
तावेवं सहसा विलोक्य हसितव्यग्रा शिवा पातु वः ॥

Parvati - O Ganapati!
Ganapati - Well, mother!
Parvati - Why are you weeping?
Ganapati - Shanmukha twisted my ears.
Parvati - O Skanda! What is this mischief of yours ?
Shanmukha - It was he who first counted my eyes.
Parvati - Ganapati it was not proper on your part.
Ganapati - He measured the length of my trunk.
Thus the complaints multiplied.

Let Parvati, who is watching the quarrel of such children protect you.

३. समस्या - २

In certain enigmatic verses, there is an obvious contradiction in meaning. But when the words are carefully separated, the problem resolves itself. One such enigmatic verse is given below. Try to solve the problem in it.

तातेन कथितं पुत्र ! लेखं लिख ममाज्ञया ।
न तेन लिखितो लेखः पितुराज्ञा न लोपिता ॥

"A father asked his son to write a letter according to his direction. Neither he wrote the letter nor disobeyed the father."

This is the obvious meaning. There is a contradiction here. Try to solve the problem by the rearrangement of the words in the stanza.

The answer is given at the end of the lesson.

४. सुभाषितम् - २

अङ्गं गलितं पलितं मुण्डं दशनविहीनं जातं तुण्डम् ।
वृद्धो याति गृहीत्वा दण्डं तदपि न मुञ्चत्याशापिण्डम् ॥

पदविभागः

अङ्गम्, गलितम्, पलितम्, मुण्डम्, दशनविहीनम्, जातम्, तुण्डम्, वृद्धः, याति, गृहीत्वा, दण्डम्, तत्, अपि, न, मुञ्चति, आशापिण्डम् ।

तात्पर्यम्

The body is dropping, the head is grey-haired, the mouth has no teeth, growing old, the man moves with a staff. Yet the knot of desire has not been loosened.

अन्वयार्थः

अङ्गम् = The Limb, गलितम् = is dropping, मुण्डम् = the head, पलितम् = has grey hair, तुण्डम् = the mouth, दशनविहीनं जातम् = has become devoid of teeth. वृद्धः = growing old, he दण्डं गृहीत्वा याति = goes holding a staff, तदपि = yet, आशापिण्डम् = the bond of attachment, न मुञ्चति = does not give up.

५. पदसङ्ग्रहः - Vocabulary

खाद् - To eat

१. खादति, २. खाद्यते, ३. खादिष्यति

४. खादितव्यम् - खादनीयम्, ५. खादितः - खादिता - खादितम्,

६. खादितवान् - खादितवती, ७. खादन् - खादन्ती, ८. खादित्वा - सङ्खाद्य, ९. खादितुम् ।

हृ - to carry

१. हरति, २. ह्रियते, ३. हरिष्यति

४. हर्तव्यम् - हरणीयम्, ५. हृतः - हृता - हृतम्, ६. हृतवान् - हृतवती,
७. हरन् - हरन्ती, ८. हृत्वा - परिहृत्य, ९. हर्तुम् ।

निन्द् - to blame

१. निन्दति, २. निन्द्यते, ३. निन्दिष्यति

४. निन्दितव्यम् - निन्दनीयम्, ५. निन्दितः - निन्दिता - निन्दितम्,

६. निन्दितवान् - निन्दितवती, ७. निन्दन् - निन्दन्ती, ८. निन्दित्वा - संनिन्द्य, ९. निन्दितुम् ।

नी - to lead, to carry

१. नयति, २. नीयते, ३. नेष्यति

४. नेतव्यम् - नयनीयम्, ५. नीतः - नीता - नीतम्, ६. नीतवान् - नीतवती,

७. नयन् - नयन्ती, ८. नीत्वा - प्रणीय (making), ९. नेतुम् ।

क्रीड् - to play

१. क्रीडति, २. क्रीड्यते, ३. क्रीडिष्यति

४. क्रीडितव्यम् - क्रीडनीयम्, ५. क्रीडितः - क्रीडिता - क्रीडितम्,

६. क्रीडितवान् - क्रीडितवती, ७. क्रीडन् - क्रीडन्ती, ८. क्रीडित्वा - सङ्क्रीड्य, ९. क्रीडितुम् ।

दृश् - to see

१. पश्यति, २. दृश्यते, ३. द्रक्ष्यति

४. द्रष्टव्यम् - दर्शनीयम्, ५. दृष्टः - दृष्टा - दृष्टम्, ६. दृष्टवान् - दृष्टवती, ७. पश्यन् - पश्यन्ती, ८. दृष्ट्वा - सन्दृश्य, ९. द्रष्टुम् ।

Special Point

क्रीडन्, पिबन्, पश्यन् etc are present participle forms. They mean playing, drinking, looking etc. Their feminine forms are क्रीडन्ती, पिबन्ती, पश्यन्ती etc.

The plural of present tense and the above feminine forms look almost similar. But their meanings are different. Observe the following :

पश्यन्ति - (They) see (Present Tense)
पश्यन्ती - seeing (Fem.)
क्रीडन्ति - (They) play
क्रीडन्ती - Playing (Fem.)
पिबन्ति - (They) drink
पिबन्ती - drinking (Fem.)

Keep this difference in mind while making sentences.

६. काव्यकथा

सिंहदिलीपयोः संवादः

नन्दिनी अन्यस्मिन् दिने नृपस्य परीक्षां कृतवती । सा हिमालयस्य गुहां प्रविष्टवती । दिलीपः पर्वतस्य सौन्दर्यं पश्यन् आसीत् । तदा एकः सिंहः नन्दिनीं बलात्कारेण गृहीतवान् । तेन पीडिता धेनुः उच्चैः क्रन्दनं कृतवती । नृपः आक्रन्दनं श्रुतवान् । धेनुम् अपश्यत् । धेनुं सिंहः आकर्षति । दिलीपः कुपितः अभवत् । सिंहस्य वधं कर्तुं निश्चयं कृतवान् । निषङ्गात् बाणं स्वीकर्तुं करं स्थापितवान् । किन्तु करः तत्र एव स्थगितः अभवत् । नृपस्य अपमाननं सञ्जातम् । कोपः अपि अधिकः जातः ।

तदा नृपम् उद्दिश्य सिंहः - 'भूपाल ! श्रमः मास्तु । तव सर्वम् अस्त्रं, शस्त्रं व्यर्थं भवति । अहं शिवस्य सेवकः । मम नामधेयं कुम्भोदरः । समीपे देवदारुवृक्षं पश्यसि खलु ? पार्वती प्रीतिपूर्वकं तं वृक्षं वर्धितवती । वृक्षस्य रक्षणार्थं पार्वती मां नियुक्तवती । अत्र आगतः प्राणी मम आहारः । अतः धेनुं न त्यजामि' इति अकथयत् ।

तत् वचनं श्रुत्वा नृपः - 'अहम् अपि शिवपूजकः । सः गौरवार्हः । मम आचार्यः वसिष्ठः । तस्य धेनुः एव धनम् । अतः प्रार्थनां करोमि । मम देहं खाद, धेनुं त्यज' इति अवदत् ।

सिंहः किञ्चित् अहसत् । 'त्वं जगत्प्रभुः । नूतनं वयः । सुन्दरं शरीरम् । इदं सर्वम् अल्पस्य कारणेन त्यजसि किम् ? त्वं विचारमूढः' इति अकथयत् ॥

Dialogue between the Lion and Dilipa

Another day Nandini tested the King. She entered a cave of Himalaya. Dilipa was observing the beauty of the mountain. Then a lion forcibly caught Nandini. Being tormented by him the cow cried aloud. The King heard the cry. He saw the cow. The lion was dragging the cow. Dilipa became angry. He decided to kill the lion. He placed his hand to take out an arrow from the quiver. But the hand was paralysed there itself. Insult was caused to the king. Anger too increased.

Then the lion said to the king- "O King! do not take the trouble. All your missiles and weapons are of no avail. I am a servant of Siva. My name is Kumbhodara. Are you seeing the Devadaru tree nearby? Parvati has nourished that tree with affection. Parvati has employed me for the protection of the tree. The animal that comes here is my food. Hence, I do not leave this cow."

On hearing this speech the king said - "I am also a worshipper of Siva. He is worthy of respect. Vasistha is my teacher. To him, this cow is the wealth. Hence, I am requesting you, eat my body and leave the cow."

The lion laughed a little and said- "You are the lord of the world, young in age, your body is handsome. Do you give up all this for the sake of this insignificant thing? You are poor in thinking."

७. अन्वयक्रमः

तस्मै सभ्याः सभार्याय गोप्त्रे गुप्ततमेन्द्रियाः ।
अर्हणामर्हते चक्रुर्मुनयो नयचक्षुषे ॥ २ ॥

पदविभागः

तस्मै, सभ्याः, सभार्याय, गोप्त्रे, गुप्ततमेन्द्रियाः, अर्हणाम्, अर्हते, चक्रुः, मुनयः, नयचक्षुषे ॥

अन्वयः

सभ्याः, गुप्ततमेन्द्रियाः, मुनयः, सभार्याय, गोप्त्रे, नयचक्षुषे, अर्हते, तस्मै, अर्हणाम्, चक्रुः ।

अन्वयार्थः

सभ्याः - The noble men (the pious); गुप्ततमेन्द्रियाः - who have senses under control; मुनयः - the ascetics; सभार्याय गोप्त्रे - the protector (who has come) with his wife; नयचक्षुषे - who has good policy (conduct) as his eyes; अर्हते - worthy; तस्मै - to (Dilipa); अर्हणाम् - the worship; चक्रुः - offered.

तात्पर्यम्

There were many ascetics (hermits) in the hermitage of Vasistha. All of them knew the etiquette and had subdued their senses. These men offered worship to Dilipa who was accompanied by his wife. Dilipa too was not an ordinary man. He was the protector of all his subjects and on no occasion had he transgressed the rules prescribed in the shastras. Hence he was worthy of worship offered by the ascetics.

विधेः सायन्तनस्यान्ते स ददर्श तपोनिधिम् ।
अन्वासितमरुन्धत्या स्वाहयेव हविर्भुजम् ॥ ३ ॥

पदविभागः

विधेः, सायन्तनस्य, अन्ते, सः, ददर्श, तपोनिधिम्, अन्वासितम्, अरुन्धत्या, स्वाहया, इव, हविर्भुजम् ।

अन्वयः

सायन्तनस्य, विधेः, अन्ते, स्वाहया (अन्वासितं) हविर्भुजम्, इव, अरुन्धत्या, अन्वासितं, तपोनिधिं, सः, ददर्श ।

अन्वयार्थः

सायन्तनस्य विधेः अन्ते - At the end of (After the completion of) the evening rites; स्वाहया - in the company of Swaha; अन्वासितं - living (in the company of) हविर्भुजम् इव - like fire; अरुन्धत्या - (with) Arundhati; अन्वासितम् - living in the company; तपोनिधिम् - who has penance as his wealth; सः - Dilipa; ददर्श - saw.

तात्पर्यम्

When Dilipa reached the hermitage of Vasishtha, it was dusk. Therefore the sage was engaged in evening rites. The king waited till the completion of the evening rites, after which the king had the audience of the sage. The wife Arundhati was also seated with the sage. As he had just performed the Agnihotra with his wife Arundhati beside, the sage looked like fire in the company of Swaha.

८. सङ्ग्राह्यविषयाः

१. आश्रमचतुष्टयम् - ब्रह्मचर्य, गृहस्थ, वानप्रस्थ and संन्यास ।
२. चतुरङ्गानि - रथ, गज, अश्व and पदाति ।
३. चतुरुपायाः - साम, दान, भेद and दण्ड ।
४. चतुर्गतयः - देव, मनुष्य, तिर्यक् and नारक ।
५. चतुर्वेदाः - ऋग्वेद, यजुर्वेद, सामवेद and अथर्ववेद ।
६. चतुर्वर्गाः - धर्म, अर्थ, काम and मोक्ष ।

Answer to the समस्या

Answer to the problem can be obtained through the re-arrangement of the words in the verse.

Make the words न तेन into one word as नतेन which means 'with humility.' Since he wrote the letter with 'modesty,' the father's direction was not disobeyed by him.

ॐ

संस्कृतभारती

पत्रालयद्वारा संस्कृतम्

परिचयः

द्वितीयः पाठः - SECOND LESSON

प्रश्नाः

I. Write पदविभाग, अन्वय, अन्वयार्थ and तात्पर्य of the following slokas (Stanzas)

१) वक्रतुण्ड महाकाय सूर्यकोटिसमप्रभ ।
निर्विघ्नं कुरु मे देव सर्वकार्येषु सर्वदा ॥

२) व्यासं वसिष्ठनप्तारं शक्तेः पौत्रमकल्मषम् ।
पराशरात्मजं वन्दे शुकतातं तपोनिधिम् ॥

नप्ता - Great grandson, अकल्मषम् - faultless

II. Translate the following sentences.

1. He fell down while seeing (Looking on)
2. Milk was drunk by him.
3. The book was carried by me.
4. You will eat fruit tomorrow.

III. Complete the following sentences :

१) त्वं चलचित्रं .... ।

२) त्वया पर्वतः .... (दृश्) ।

३) अन्धः .... अपतत् ।

Treasure of knowledge in Ancient India

Aeronatics :

Bharadvaja is the author of this great Science. There are aphorisms on this science composed by that sage. These aphorisms can be seen in the verses of a work called "Bodhanandavritti".

There are discriptions of the manufacturing methods of different kinds of aerial cars. The metal that has to be used and other tools that are required are given here. There is also description about how a pilot should practise and the things which give strength to him.

Indeed it is quite thought provoking. Another unique feature of this is that it delineates how an aerial car with three storeys can be manufactured.

In this work sage Bharadvaja gives details about the visits one can make to different parts of the world and also about how different things can be carried in the aerial car.

Tarpode, a scientist couple of mumbai, prepared an aerial car called 'marutsava' as per its specification. Exploiting the solar power their device flew about 2000 ft. and fell beyond the sea. This event took place in 1865. Obviously the first expedition in an aeroplane happened in India.

PRINTED BOOK

(clause 128 of p.o. Guide, part-1)

सविधे,

Dr. Demian Martins

संस्कृतम् संस्कृतम् संस्कृतम् संस्कृतम् संस्कृतम् संस्कृतम्

CONVENER
SAMSKRIT THROUGH CORRESPONDENCE
"AKSHARAM", 8TH CROSS, II PHASE
GIRINAGARA, BANGALORE-560 085
PHONE : 6721052